॥ ॐ नमो भगवते वासुदेवाय ॥

# श्रीमद् भागवत रसिक कुटुंब

## श्री राधा कृपा कटाक्ष




श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्री राधा कृपा कटाक्ष

मुनीन्द्र–वृन्द–वन्दिते त्रिलोक–शोक–हारिणि
प्रसन्न-वक्त्र-पङ्कजे निकुञ्ज-भू-विलासिनि ।
व्रजेन्द्र–भानु–नन्दिनि व्रजेन्द्र–सूनु–संगते
कदा करिष्यसीह मां(ङ्) कृपाकटाक्ष–भाजनम् ॥ 1 ॥

अशोक–वृक्ष–वल्लरी वितान–मण्डप–स्थिते
प्रवालबाल–पल्लव प्रभारुणांघ्रि–कोमले ।
वराभयस्फुरत्करे प्रभूतसम्पदालये
कदा करिष्यसीह मां(ङ्) कृपाकटाक्ष–भाजनम् ॥ 2 ॥

अनङ्ग-रङ्ग मङ्गल-प्रसङ्ग-भङ्गुर-भ्रुवां
सविभ्रमं ससम्भ्रमं(न्) दृगन्त–बाणपातनैः ।
निरन्तरं वशीकृतप्रतीतनन्दनन्दने
कदा करिष्यसीह मां(ङ्) कृपाकटाक्ष–भाजनम् ॥ 3 ॥

तडित्–सुवर्ण–चम्पक –प्रदीप्त–गौर–विग्रहे
मुख–प्रभा–परास्त–कोटि–शारदेन्दुमण्डले ।
विचित्र-चित्र सञ्चरच्चकोर-शाव-लोचने
कदा करिष्यसीह मां(ङ्) कृपाकटाक्ष–भाजनम् ॥ 4 ॥

मदोन्मदाति–यौवने प्रमोद–मान–मण्डिते
प्रियानुराग–रञ्जिते कला–विलास – पण्डिते ।
अनन्यधन्य–कुञ्जराज्य–कामकेलि–कोविदे
कदा करिष्यसीह मां(ङ्) कृपाकटाक्ष–भाजनम् ॥ 5 ॥

अशेष–हावभाव–धीरहीरहार–भूषिते
प्रभूतशातकुम्भ–कुम्भकुम्भि–कुम्भसुस्तनि ।
प्रशस्तमन्द–हास्यचूर्ण पूर्णसौख्य –सागरे
कदा करिष्यसीह मां(ङ्) कृपाकटाक्ष–भाजनम् ॥ 6 ॥

मृणाल-वाल-वल्लरी तरङ्ग-रङ्ग-दोर्लते
लताग्र–लास्य–लोल–नील–लोचनावलोकने ।
ललल्लुलन्मिलन्मनोज्ञ–मुग्ध–मोहिनाश्रिते
कदा करिष्यसीह मां(ङ्) कृपाकटाक्ष–भाजनम् ॥ 7 ॥

सुवर्णमल्लिकाञ्चित –त्रिरेख–कम्बु–कण्ठगे
त्रिसूत्र–मङ्गली-गुण–त्रिरत्न-दीप्ति–दीधिते ।
सलोल–नीलकुन्तल–प्रसून–गुच्छ–गुम्फिते
कदा करिष्यसीह मां(ङ्) कृपाकटाक्ष–भाजनम् ॥ 8 ॥

नितम्ब–बिम्ब–लम्बमान–पुष्पमेखलागुणे
प्रशस्तरत्न-किङ्किणी-कलाप-मध्य मञ्जुले।
करीन्द्र–शुण्डदण्डिका–वरोहसौभगोरुके
कदा करिष्यसीह मां(ङ्) कृपाकटाक्ष–भाजनम् ॥ 9 ॥

अनेक–मन्त्रनाद–मञ्जु नूपुरारव–स्खलत्
समाज–राजहं(व्)स–वं(व्)श–निक्वणाति–गौरवे ।
विलोलहेम–वल्लरी–विडम्बिचारु–चङ्क्रमे
कदा करिष्यसीह मां(ङ्) कृपाकटाक्ष–भाजनम् ॥10॥

अनन्त–कोटि–विष्णुलोक–नम्र–पद्मजार्चिते
हिमाद्रिजा–पुलोमजा–विरिञ्चजा-वरप्रदे ।
अपार–सिद्धि–ऋद्धि–दिग्ध–सत्पदाङ्गुली-नखे
कदा करिष्यसीह मां(ङ्) कृपाकटाक्ष–भाजनम् ॥11॥

मखेश्वरि क्रियेश्वरि स्वधेश्वरि सुरेश्वरि
त्रिवेद–भारतीश्वरि प्रमाण–शासनेश्वरि ।
रमेश्वरि क्षमेश्वरि प्रमोद–काननेश्वरि
व्रजेश्वरि व्रजाधिपे श्रीराधिके नमोस्तुते ॥12॥

इती ममद्‌भुतं-स्तवं(न्) निशम्य भानुनन्दिनी
करोतु सन्ततं(ञ्) जनं(ङ्) कृपाकटाक्ष-भाजनम् ।
भवेत्तदैव सञ्चित त्रिरूप–कर्म नाशनं
लभेत्तदा व्रजेन्द्र–सूनु–मण्डल–प्रवेशनम् ॥13॥

राकायां(ञ्) च सिताष्टम्यां(न्), दशम्यां(ञ्) च विशुद्धधीः ।
एकादश्यां(न्) त्रयोदश्यां, यः(फ्) पठेत्साधकः(स्) सुधीः ॥14॥

यं यं(ङ्) कामयते कामं(न्), तं(न्) तमाप्रोति साधकः ।
राधाकृपाकटाक्षेण, भक्तिः(स्)स्यात् प्रेमलक्षणा ॥15॥

ऊरुदघ्ने नाभिदघ्ने, हृद्दघ्ने कण्ठदघ्नके ।
राधाकुण्डजले स्थिता, यः(फ्) पठेत् साधकः(श्) शतम् ॥16॥

तस्य सर्वार्थ सिद्धिः(स्) स्याद्, वाक्सामर्थ्यं(न्) तथा लभेत् ।
ऐश्वर्यं(ञ्) च लभेत् साक्षात्, दृशा पश्यति राधिकाम् ॥17॥

तेन स तत्क्षणादेव, तुष्टा दत्ते महावरम् ।
येन पश्यति नेत्राभ्यां(न्), तत् प्रियं श्यामसुन्दरम् ॥18॥

नित्यलीला–प्रवेशं(ञ्) च, ददाति श्री-व्रजाधिपः ।
अतः(फ्) परतरं प्रार्थ्यं, वैष्णवस्य न विद्यते ॥19॥

॥ इति श्रीमदूर्ध्वाम्नाये श्रीराधिकायाः(ख्) कृपाकटाक्षस्तोत्रं सम्पूर्णम्॥